Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 4 | ISSN : 2581- 6306

# भारतीयज्ञानपरम्परायां मूल्यशिक्षा

डा. इक्कुर्ति वेङ्कटेश्वर्लु
शिक्षाशास्त्रविभागः, नवदेहली, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

**Article Info**
Volume 5, Issue 4
Page Number : 98-102

**Publication Issue :**
July-August 2022

**Article History**
Accepted : 01 July 2022
Published : 20 July 2022

**शोधसारांशः**– मूल्यानि आचरणीयानि न तु बोधनीयानि इति आङ्लेयानां सूक्तिरनुसारं भारते अतिप्राचीनकालतः मूल्यानि न बोध्यन्ते आचरणे, व्यवहारे, साहित्ये च आनीतानि वर्तन्ते। अपि च भारतीयज्ञानपरम्परायां साहित्ये मूल्यानि अर्थात् आचारः जीवनपद्धतौ एव आनीत अस्ति। वेदेषु, वेदाङ्गेषु, दर्शनेषु, काव्येषु, पुराणेषु, आयुर्वेदधनुर्वेदादि शास्त्रेषु च मूल्यानि आचराणात्माकि उपनिबद्धानि आसन्। अतः भारतीयज्ञानपरम्परायां यानि मूल्यानि आचरणानि च आसन् तानि पुनः 2020 शिक्षानीत्यनुसारम् आचरणे आनेतव्यानि भवन्ति। केवलं बोधनेन प्रयोजनं न स्यादिति मे मनः।

**मुख्यपदानिः-** भारतीयं, ज्ञानपरम्पारा, मूल्यशिक्षा, आचारमीमांसा, धर्मः, अर्थः, कामः, मोक्षः।

**प्रस्तावना**

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः ।।**

भुप्रपञ्चे अनेकानि राष्ट्रानि विलसन्ते। तेभ्यः सर्वेभ्यः अपि राष्ट्रेभ्यः , तत्रत्य मानवेभ्यः च एतस्मादेव शिक्षा गतेति अधुना प्रपञ्चेन विदितैव। अखिलस्य ज्ञानस्य, धर्मस्य च मूलं तु वेदेति सर्वप्रपञ्चेन ज्ञयते। अत्रैव ज्ञानविज्ञानकर्मधर्मवेदान्ताचारदयः समुदभूताः वर्तन्ते।

भारतादेव सभ्यता, संस्कारः, आचारः अर्थात् मूल्यानि च अन्येभ्यः देशेभ्यः प्रसारितानीति नास्ति विसंवादः लेशमात्रोऽपि। अतैव भातरं विश्वगुरुः इति कथ्यते स्म। या आचारमीमांसा वर्तते तदेव मूल्यमिति नाम्ना अभिदियते आधिनिकशिक्षाव्यवस्थायामिति ज्ञातव्यम्।

**भारतीयज्ञानपरम्परा-** भारतीयज्ञानपरम्परायाः ज्ञानाय भारतस्य भौगौलिकैतिहासिकवाङ्यस्य च अध्ययनमत्यावश्यकमस्ति। तद् यथा –

**प्राचीनभारतीयसांस्कृतिकेतिहासः-** विश्वान्तराले बहूनि राष्ट्राणि विलसन्ति। एषु अन्यतमं भवति भारतम् । भारतराष्ट्रमतीवप्राचीनतमं राष्ट्रमस्ति। अत एव आर्षभारतम्, पुण्यभूमिः, धर्मभूमिः, प्राचीनभारतम् इत्यभिधीयते। प्रत्येकं राष्ट्रस्यापि प्रगतिः तद्राष्ट्रस्य भौगोलिक-सांस्कृतिकेतिहासमाधृत्य तिष्ठति । प्राचीनभारतीयसांस्कृतिकेतिहासस्य अध्ययनात् प्राक् भौगोलिकेतिहासस्य अध्ययनं करणीयम् ।

**प्राचीनभारतीयभौगोलिकेतिहासः-** प्राचीनभारतास्य आर्यावर्तः इति सुप्रसिद्धं नाम आसीत् । मुनयः अस्य देशस्य नाम आर्यावर्तः इति उल्लिखितवन्तः। भारतस्य भौगोलिकविषये एवमवोचत् –

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ।

**तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधा:।। मनुस्मृति: 2.22**

**उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।**

**वर्षं तद् भारतं नाम भारती यत्र सन्तति:।। विष्णुपुराणम् 2.31**

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराज: ।**

**पूर्वापरौ तोयनिधी वगाह्य स्थित: पृथिव्या इव मानदण्ड: ।। कुमारसम्भव:,1.1**

इति पूर्व–पश्चिम–दक्षिणोत्तरभागे स्थितानां पर्वतानां समुद्राणां चिह्नानि सुस्पष्टमुल्लिखितानि। एतादृश–सुन्दरभौगोलिकदेशे अतीवाचरणीया संस्कृतिरपि आसीत्।

**सांस्कृतिकेतिहास:-** सुन्दरभौगोलिकेतिहास: अस्तीति हेतो: अतीवाचरणात्मकसंस्कृति: अस्य भारतदेशस्य वर्त्तते। संस्कृते: निर्माणं विकास:, प्रसारश्च अनेकेषां तत्त्वानामुपरि आधारितं भवति । तानि यथा सागरा: – वनानि – पर्वता: – नद्य: – पुण्यक्षेत्राणि, एतादृशानां भौगोलिकानां तत्त्वानामुपरि आधारिता। यथा ज्योतिश्शास्त्रानुगुणं विभिन्नऋतव: क्रमश: आयान्ति तेषामाधारेणैव काल: भवति एतादृशा कर्षणीयप्रशान्तभौगोलिकवातावरणे अस्माकं जीवनं शान्तमयं ज्ञानपूर्णं च भवति। तादृशमार्गे प्रादुर्भूता: बहवो मुनय: ऋषय: महर्षय: एवं मनीषिण: च । तस्मात् भारतीयानां सामाजिक–सांस्कृतिक– राजकीय–जीवनविधानं कथं स्यादिति सङ्घर्षे आदर्शमयी संस्कृते: विस्फोटनमभवत्। देशस्य भौगोलिक–सांस्कृतिकप्रभाव: तस्मिन् देशे आविर्भूतवाङ्मयस्योपरि भवत्येव। सांस्कृतिकप्रभाव: अस्मत्प्राचीनवाङ्मये अस्त्येवेति निश्चप्रचं वक्तुं शक्नुम: । प्राचीनभारतवर्षस्य वाङ्मये वेदा: अस्माकं मार्गदर्शका:। यथा –

**वेदोऽखिलो धर्ममूलम्। मनुस्मृति: 2.6**

**सर्वज्ञानमयो हि स:। मनुस्मृति: 2.7**

**सङ्गच्छध्वं संवदध्वं सं वो मनासिं जानताम् ।**

**देवा भागं यथा पूर्वे संजानाना उपासते ।। ऋग्वेद: 10.191.2**

**त्वां विशो वृणुतां राज्यात। अथर्ववेद: -3.4.2**

**विशस्त्वा सर्वा वाञ्छन्तु। अथर्ववेद: 4.8.4**

**विशि राजा प्रतिष्ठित:। यजुर्वेद: 20.9**

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चाऽप्यवधार्यताम् ।**

**आत्मन: प्रतिकूलानि परेषां न समाचरेत् ।। महाभारतम् ।**

एवं सांस्कृतिक – राजनैतिक – साङ्घिक – सामाजिक – शैक्षिकविषया: बहुधा बहुत्र उल्लिखिता: भारतीयज्ञानपरम्परायां ।

**भारतीयज्ञानपरम्परा-** भारतीयप्राचीनसंस्कृतवाङ्मयविषये सामान्यमानव: वक्तुं न पारयति न शक्नोति च । संस्कृतवाङ्मयम् अपारम् अनन्तम् अगाधं गभीरं च विद्यते । वेदोऽखिलो धर्ममूलम् इति मनुस्मृतौ उक्तेन कथनेन भारतीयवाङ्मयस्य आद्यं तु वेद: एव। वेदादारभ्य काव्यपर्यन्तं संस्कृत– वाङ्मयं विराजते। तदत्र विचार्यते ।

वेदा: – 1. ऋग्वेद: 2. यजुर्वेद: 3. सामवेद: 4. अथर्ववेद: ।

उपवेदा: – 1. आयुर्वेद: (चरक– सुश्रुत – काश्यप: – अष्टाङ्गहृदयादय:) 2. धनुर्वेद:
3. गान्धर्ववेद: , 4. अर्थवेद: ।
वेदाङ्गानि – 1. शिक्षा , 2. व्याकरणम् , 3. निरुक्तम् 4. छन्द: 5. ज्योतिषम् 6. कल्पम्।
वेदोपाङ्गानि:– 1. वैशेषिक: 2. न्याय: 3. सांख्य: 4. योग: 5. पूर्वमीमांसा 6. उत्तरमीमांसा
ब्रह्मणानि:– शतपथ, ताण्ड्य, तैत्तिरीयादीनि ।
आरण्यकानि:– बृहदारण्यकम् , ऐतरेयारण्यकं, तैत्तिरीयारण्यकम् इत्यादीनि ।
उपनिषद: – ईशकेनकठमुण्डकमाण्डूक्यछान्दोग्यादय: ।
वेदान्ता: – अद्वैत – विशिष्टाद्वैत–द्वैत–द्वैताद्वैतादिवेदान्ता: ।
धर्मग्रन्था: – मनु – पाराशर – याज्ञवल्क्यादिधर्मशास्राणि ।
गृह्यसूत्राणि:– आपस्तम्ब–गौतमादि ऋषिप्रणीतानि ।
पुराणानि:– अष्टादशपुराणानि, भागवत – गरुड – बह्म – बह्माण्डादीनि एवम् उपपुराणानि च ।
इतिहासादय: – रामायणभारतादय:।
काव्यानि – कालिदास – माघ – भास – बाणादीनां काव्यानि ।

एवमनन्तमपारं भारतीयसंस्कृतवाङ्गयम् इदं सर्वेभ्य: ज्ञानभिक्षाम् अददात् । अस्मिन् वाङ्मये ज्ञान – विज्ञान – दार्शनिक – धार्मिक – सामाजकि – सांघिक– राजकीय – नैतिक– आचार–मूल्य–शैक्षिकादिविषया: तत्र तत्र यथोचितम् उल्लिखिता: विलसन्ति च।

इत्यादिषु सर्वेष्वपि मानवहिताय, सामाजिकविकासाय, धर्मपरिक्षणाय, पर्यावरणपरिरक्षणाय, वैज्ञानिकविकासाय च आचरणात्मकमूल्यानि उक्तानि वर्तन्ते।

**मूल्यस्य शब्दार्थ:** – भारतीयसंस्कृतवाङ्मये मूल्यशब्दस्य प्रयोग: शील शब्दार्थे कृतोऽस्ति शब्दोऽयं न मूल्यशब्दस्य पर्याय: अपितु तत्समवाची शब्द: वर्तते। अस्य च आङ्गलपदं भवति। Value इति Value इति शब्द: लैटिन्भाषाया: Valere इति शब्दात् उत्पन्नोऽस्ति। यस्य च अर्थ: कस्यचन वस्तुन: मूल्यम्, गुणम्, विशेषताम् उपयोगितां वा सूचयति।

**मूल्यशिक्षा - मूल्याधारितशिक्षाया: अर्थ:**

मूल्याधारिशिक्षा नाम मूल्यानामुरि आधारितशिक्षा इति उच्यते। अत्र अनौपचारिकरूपेण छात्रेभ्य: मूल्यशिक्षा दीयते। अत्र मूल्याधारितशिक्षा वा नैतिकशिक्षा वा केवलं चरित्रनिर्माणशिक्षा, आचरणशिक्षा वा नास्ति। अपि च बालस्य सर्वाङ्गीणविकासाय दीयमाना शिक्षा मूल्याधारितशिक्षा इत्युच्यते। मानवीयजीवनं तथा सदाचारणविषयशिक्षा भवति मूल्यशिक्षा। अस्या: नाम नैतिकशिक्षा इत्यपि वक्तुं शक्यते।

**भारतीयदृष्ट्या मूल्यवर्गीकरणचिन्तनम्:-**

भारतीया: मूल्यानि धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थेषु व्यभजन्। कुप्पस्वामी (1972) अकथयत् यत् प्राचीनेषु एषु मूल्येषु आधुनिकमूल्यानि न संयुक्तानीति कथनमयुक्तमिति। प्राचीनमूल्यानीत्थं सन्ति।

1. धर्म: कर्तव्यनिर्वहणम्।
2. भौतिकसुखसम्पदर्जनपराणि कार्याणि अर्थ:।
3. कामे तु स्वास्थ्यसौन्दर्यपुनस्सर्जनसुखसम्बद्धानि मूल्यान्यन्तर्भवन्ति।

4. आत्यन्तिककदु:खनिवृत्ति: परमात्मन: प्राप्तिश्च मोक्ष: इत्यभिधीयते।

अर्थ: आर्थिकमूल्यानां साधनमूल्यानाञ्च जीवनशैलीनिर्धारणस्य च प्राधान्यमदात्। विश्वसम्बन्धसिद्धान्तस्थापने न तस्याभिनिवेश:। पुरुषार्था: तादृशानि मूल्यानि भवन्ति यानि पुरुष: स्वार्थसिद्धये प्राप्तुमभिषति। धर्ममोक्षौ आध्यात्मिकमूल्ये इति कृत्वा भौतिकमूल्ययो: अर्थकामयोरपेक्षया श्रेष्ठौ। पुरुषस्सदा निम्नमूल्यानि त्यजन्नेव श्रेष्ठमूल्यान्यधिगन्तुं प्रयतेत। श्रेष्ठमूल्यप्राप्तौ साधनत्वेन ग्राह्यानीति – शेषाद्रि: (1983)व्यक्तिदृष्ट्याभारतीयसन्दर्भे द्विधा मानवीयमूल्यानिविभक्तानिआत्मगुणा:, सहजगुणाश्च। (भगवद्गीता)

**भारतीयसन्दर्भेआचारसंहिता**

प्रत्येकं शास्त्रस्य बोधावसरे मानवीयमूल्यानि संयोज्य शास्त्राणिबोध्यन्ते। यथा-

- दर्शनेन-आचार:-जागरणम्।
- अनुष्ठानम्।
- भोजनपद्धति:।
- वस्त्रधारणम्।
- शिखाधारणम्।
- ज्येष्ठबन्धनम्।
- गुरुणां सेवा।
- मातृदेवो भव, पितृदेवो भव।
- अतिथिदेवो भव।

**वेदानुसारम्** – कर्मकाण्ड:इत्युक्तेआचारसंहिता, ज्ञानकाण्ड:इत्युक्ते।

उपनिषदीया तु प्रार्थना एवसर्वकल्याणस्य वर्तते। अर्थात् मानवीयमूल्यंभारतीयपरम्परानुरोधेन सर्वकल्याणप्रकाशकमेववर्तते।

**साहित्यानुसारम्** – समाजव्यवहार:, लक्षणादिवृत्तिप्रक्रिया कलावैशिष्ट्यम् अत्रमूल्यरूपेण भवतितत्रपुरुषार्थचतुष्ट्यंप्राप्तव्यमेव।

**व्याकरणानुसारम्** – भाषिकमूल्यानिव्याकरणेन परिव्याप्तानिसन्तियेन शुद्धता निष्ठता च भवेत्। एवं रूपेण भारतीयपरम्परानुरोधेन सर्वशास्त्राणाम् आधारेण मानवमूल्यानिप्रकटितानिभवन्ति।

**पुराणानुसारम्** – वसुधैवकुटुम्बकम्, आत्मन: प्रतिकूलानिपरेषां न समाचरेत्।

दर्शनानुसारम् – दर्शनानि आस्तिकानि, नस्तिकानीति च वर्तन्ते। सर्वेषु दर्शनेनषु अपि सृष्टे: ब्रह्माण्डस्य विषये च विवादांश: वर्तते तेन दर्शने वैज्ञानिकमूल्यानि, सामजिकमूल्यानि, सौन्दर्यमूल्यानि, अध्यात्मिकमूल्यानि, नैतिकमूल्यानि, मानवीयमूल्यानि च उपनिबद्धानीति वक्तुम् अलम्।

- विवेकानन्द:- चरित्रशिक्षा
- अरविन्द:- भावसंस्कार:, निर्मितव्यवहार:, स्वभाव:
- दयानन्द:- सदाचार:
- गुरुदेवरवीन्द्रनाथटैगोर: – नैतिकापूर्णाचरणम् आध्यात्मपरकं जीवनम्
- महात्मगान्धी- मानवकल्याणम्, सम्पूर्णविकास: च

एवं रूपेण भारतीयपरम्परायां मूल्यानां मानवस्य सच्चरित्रेण स्वीकरणं कृतम् अस्ति ।

**काव्यशास्त्रानुसारम् –** काव्यस्य प्रयोजनं भवति यत् काव्यं यशसे अर्थकृते शिवेतरक्षतये ... अर्थात् काव्यस्य अध्ययनेन पठितृणां व्यवहारस्य अर्थात् लौकिकमूल्यानि कथमनुसरणीयानिति च अवबुध्यन्ते।

**उपसंहार**:- मूल्यानि आचरणीयानि न तु बोधनीयानि इति आङ्लेयानां सूक्तिरनुसारं भारते अतिप्राचीनकालतः मूल्यानि न बोध्यन्ते आचरणे, व्यवहारे, साहित्ये च आनीतानि वर्तन्ते। अपि च भारतीयज्ञानपरम्परायां साहित्ये मूल्यानि अर्थात् आचारः जीवनपद्धतौ एव आनीत अस्ति। वेदेषु, वेदाङ्गेषु, दर्शनेषु, काव्येषु, पुराणेषु, आयुर्वेदधनुर्वेदादि शास्त्रेषु च मूल्यानि आचराणात्माकि उपनिबद्धानि आसन्। अतः भारतीयज्ञानपरम्परायां यानि मूल्यानि आचरणानि च आसन् तानि पुनः 2020 शिक्षानीत्यनुसारम् आचरणे आनेतव्यानि भवन्ति। केवलं बोधनेन प्रयोजनं न स्यादिति मे मनः।

**सन्दर्भग्रन्थसूची**

1. मूल्य शिक्षा (2009) डा. राम शकल पाण्डेय, आर लाल बुक डिपो, मेरठ– 250001।
2. नैतिकशिक्षा (1997) श्रीशरण, आधुनिक प्रकाशन, नई दिल्ली–110053।
3. भारतीयज्ञानपरम्परा (ए.ऐ.सि.टि.ई) आभासीयपटलम्।
4. श्रीमद्भगवींता, गीताप्रेस गोरखपुर।
5. मूल्याधारित शिक्षा (2014),डा. भास्कर मिश्र, कनिष्क पब्लिशर्स डिस्टीब्यूटर्स, नई दिल्ली–110053
6. शिक्षायाः दार्शनिकसामाजिकाधाराः (20010), सोमनाथसाहुः, भोपाल।